# Brahmakritam Gauri Stotram

# ब्रह्मकृतं गौरीस्तोत्रम्

## Document Information

Text title : Brahmakritam Gauri Stotram

File name : gaurIstotrambrahmakRRitaM.itx

Category : devii, devI, stotra

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2021

*sanskritdocuments.org*

# ब्रह्मकृतं गौरीस्तोत्रम्

(सौरपुराणे २५-अध्यायान्तर्गतम्)

ब्रह्मोवाच-
त्वां नमामि शिवां शान्तामीश्वरार्धशरीरिणीम् ।
अनाद्यनन्तविभवां मूलप्रकृतिमीश्वरीम् ॥ १३॥

जन्ममृत्युजरातीतां जन्ममृत्युजरपहाम् ।
क्षेत्रज्ञशक्तिनिलयां परमाकाशमध्यगाम् ॥ १४॥

ब्रह्मेन्द्रविष्णुनमितामष्टमूर्त्यङ्गिनीमजाम् ।
प्रधानपुरुषातीतां सावित्रीं वेदमातरम् ॥ १५॥

ऋग्यजुःसामनिलयामृज्वीं कुण्डलिनीं पराम् ।
विश्वेश्वरीं विश्वमयीं विश्वेश्वरपतिव्रताम् ॥ १६॥

विश्वसंहारकरणीं विश्वमायाप्रवर्तिनीम् ।
सर्गस्थित्यन्तकरिणीं व्यक्ताव्यक्तस्वरूपिणीम् ॥ १७॥

पाहि मां देवदेवेशि शरणागतवत्सले ।
नान्या गतिर्महेशानि मम त्रैलोक्यवन्दिते ॥ १८॥

त्वं माता मम कल्याणि पिता सर्वेश्वरः शिवः ।
सृष्टोऽहं त्रिपुरघ्नेन सृष्ट्यर्थं शङ्करप्रिये ॥ १९॥

विविधाश्च प्रजाः सृष्टा न वृद्धिमुपयान्ति ताः ।
ततः परं प्रजाः सर्वा मैथुनप्रभवाः किल ॥ २०॥

संवधयितुमिच्छामि कृत्वा सृष्टिमतः परम् ।
शक्तिनी खलु सर्वासां त्वत्तः सृष्टिः प्रवर्तते ॥ २१॥

नैव सृष्टं त्वया पूर्वं शक्तीनां यत्कुलं शिवे ।
सर्वेषां देहिनां देवि सर्वशक्तिप्रदायिनी ॥ २२॥

त्वमेव नात्र सन्देहस्तस्मात्त्वं वरदा भव ।
मम सृष्टिविवृद्ध्यर्थमंशेनैकेन शाश्वते ॥ २३॥

मम पुत्रस्य दक्षस्य पुत्री भव शुचिस्मिते ।
प्रार्थिता वै तदा देवी ब्रह्मणा मुनिपुङ्गवाः ॥ २४॥

एकां शक्तिं भूयोर्मध्यात्ससर्जात्मसमप्रभाम् ।
आह तां प्रहसन्प्रेक्ष्य देवीं विश्वेश्वरो हरः ॥ २५॥

ब्रह्मणो वचनाद्देवि कुरु तस्य यथेप्सितम् ।
आदाय शिरसा शम्भोराज्ञां सा परमेश्वरी ॥ २६॥

अभवद्दक्षदुहिता स्वेच्छया ब्रह्मरूपिणी ।
पुनराद्या परा शक्तिः शम्भोर्देहं समाविशत् ॥ २७॥

अर्धनारीश्वरो देवो विभातीति हि नः श्रुतिः ॥

ततः प्रभृति विप्रेन्द्रा मैथुनप्रभवाः प्रजाः ॥ २८॥

एवं वः कथिता विप्रा देव्याः सम्भूतिरुत्तमा ।
पठेद्यः शृणुयाद्वाऽपि सन्ततिस्तस्य वर्धते ॥ २९॥

इति सौरपुराणे पञ्चविंशत्यध्यायान्तर्गतं ब्रह्मकृतं
गौरीस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by PSA Easwaran

*Brahmakritam Gauri Stotram*

pdf was typeset on December 11, 2021

Please send corrections to *sanskrit@cheerful.com*